## दयतेर्दिगि लिटि। (९/२३८८)

दयतेरङ्गस्य लिटि परतो दिगि इत्ययमादेशो भवति। अवदिग्ये, अवदिग्याते, अवदिग्यिरे। दयतेः इति दीङो (धा. पा. ११३५) ग्रहणं न तु 'दय दाने' (धा. पा. ४८१) इत्यस्य। तस्य हि लिटि [1]आम् विहितः। दिग्यादेशेन [2]द्विर्वचनस्य बाधनमिष्यते॥

## ऋतश्च संयोगादेर्गुणः। (१०/२३७९)

[3]ऋकारान्तस्य अङ्गस्य संयोगादेः गुणो भवति लिटि परतः। स्वृ – सस्वरतुः। सस्वरुः। ध्वृ – दध्वरतुः। दध्वरुः। [4]स्मृ – सस्मरतुः। सस्मरुः। ऋतः इति किम्? [5]चिक्षियतुः। चिक्षियुः। संयोगादेः इति किम्? चक्रतुः। चक्रुः। प्रतिषेधविषयेऽपि गुणो यथा स्यात् इत्ययमारम्भः। वृद्धिविषये तु पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते। सस्वार। सस्मार[6]। लिटि इत्येव, स्मृतः। स्मृतवान्।

[८७०] संयोगादेर्गुणविधाने संयोगोपधग्रहणं कृञर्थं कर्तव्यम्। (म. भा. ३.३४७)

सञ्चस्करतुः, सञ्चस्करुः इति। अत्र हि 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' (सी. प. १२८) इत्यत्र दर्शने लिटि कृते, तदाश्रये च द्विर्वचने, पश्चादुपसर्गयोगे सति, [7]'अडभ्यासव्यवायेऽपि' (६.१.१३६/२५३९) इति सुट् क्रियते। एवं च कृत्वा संस्क्रृषीष्ट, उपस्क्रृषीष्ट इत्यत्र सुटो बहिरङ्गलक्षणस्य असिद्धत्वात् ऋतश्च संयोगादेः इति इडागमो न भवति॥

## ऋच्छत्यॄताम्। (११/२३८३)

ऋच्छतेरङ्गस्य, ऋ इत्येतस्य, ॠकारान्तानां च लिटि परतो गुणो न भवति। [8]ऋच्छ – आनर्च्छ, [9]आनर्च्छतुः, आनर्च्छुः। [10]ऋ – आरतुः, आरुः। ॠकारान्तानाम् – [11]निचकरतुः, [12]निचकरुः। निजगरतुः, निजगरुः। ऋच्छेरलघूपधत्वादप्राप्तो गुणो विधीयते, ॠतां तु प्रतिषिद्धः। वृद्धिविषये तु पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते। निचकार। निजगार॥

## शॄदॄप्रां ह्रस्वो वा। (१२/२४०८)

शॄ दॄ पॄ इत्येतेषामङ्गानां लिटि परतो वा ह्रस्वो भवति। शॄ – विशश्रतुः, विशश्रुः। विशशरतुः, विशशरुः। दॄ – विदद्रतुः, विदद्रुः। विददरतुः, विददरुः। पॄ – निपप्रतुः, निपप्रुः। निपपरतुः, निपपरुः। ह्रस्ववचनम् इत्वोत्वनिवृत्त्यर्थम्।

केचिदेतत् सूत्रं प्रत्याचक्षते। 'श्रा पाके' (धा. पा. १०५४), 'द्रा कुत्सायां गतौ' (धा. पा. १०५५), 'प्रा पूरणे' (धा. पा. १०६२) इत्येतेषाम् अनेकार्था[13] धातवः इति शॄदॄप्रामर्थे वर्तमानानां विशश्रतुः, विशश्रुः, विदद्रतुः, विदद्रुः, निपप्रतुः, निपप्रुः इत्येतानि रूपाणि साधयन्ति। तथा च सति क्वसौ विशशृवान् इत्येतद्रूपं न स्यात्॥

---

1. अमादेशेन भवितव्यम् ह. 2. द्विर्वचनबाधनम् क. 3. लिटि इति वर्तते इत्यधिकम् ह, ऋकारान्ताङ्गस्य इ. 4. स्मृ चिन्तायाम् ब. 5. विचिक्षिपतुः विचिक्षिपुः क. 6. दध्वार इत्यधिकम् ब. इ. 7. अभ्यासव्यवायेऽपि ब. 8. ऋच्छतेः क. 9. आनर्च्छतुः नास्ति ड. 10. ऋकारस्य ब, ऋकारस्य तु क. 11. नास्ति ड. 12. नास्ति ब. 13. हि इत्यधिकम् ब.